# Ganesha Stuti by Shiva

# શિવકૃતા ગણેશસ્તુતિઃ

## Document Information

Text title : Ganesha Stuti by Shiva

File name : gaNeshastutiHshiva.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description/comments : Mudgalapurana, Khanda 1, Adhyaya 4

Latest update : April 25, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# શિવકૃતા ગણેશસ્તુતિઃ

શિવ ઉવાચ ।
નમસ્તે વિઘ્નરાજાય નમસ્તે વિઘ્નહારિણે ।
વિઘ્નકર્ત્રે ગણેશાય વિઘ્નાનાં પતયે નમઃ ॥ ૨૦॥

લમ્બોદરાય સર્વાય વક્રતુણ્ડસ્વરૂપિણે ।
ત્રૈગુણ્યેન જગદ્રૂપનાનાભેદપ્રધારિણે ॥ ૨૧॥

નૈર્ગુણ્યેન ચ વૈ સાક્ષાદ્બ્રહ્મરૂપધરાય ચ ।
નમો નમો બન્ધહન્ત્રે ભક્તાનાં પાલકાય તે ॥ ૨૨॥

અભક્તેભ્યસ્તમોદાય નાનાભયકરાય ચ ।
હેરમ્બાય નમસ્તુભ્યં વેદવેદ્યાય શાશ્વતે ॥ ૨૩॥

અનન્તાનનરૂપાયાનન્તબાહ્વઙ્ઘ્રિકાય તે ।
અનન્તકરકર્ણાયાનન્તોદરધરાય તે ॥ ૨૪॥

નમો નમસ્તે ગણનાયકાય તે અનાદિપૂજ્યાય ચ સર્વરૂપિણે ।
અખણ્ડલીલાકરપૂર્ણમૂર્તયે મહોત્કટાયાસ્તુ નમો મહાત્મને ॥ ૨૫॥

આદૌ ચ નિર્માય વિધિં રજોમયં તેનૈવ સૃષ્ટિં વિદધાસિ દેવ ।
સત્ત્વાત્મકં વિષ્ણુમથો હિ મધ્યે નિર્માય પાસિ ત્વમખણ્ડવિક્રમ ॥ ૨૬॥

અન્તે તમોરૂપિણમેવ સૃષ્ટ્વા શમ્ભું સ્વશક્ત્યા હરસિ ત્વમાદ્ય ।
એવંવિધં ત્વાં પ્રવદન્તિ વેદાઃ તં વૈ ગણેશં શરણં પ્રપદ્યે ॥ ૨૭॥

માયામયં વૈ ગુણપં તુ સૃષ્ટ્વા તસ્માત્પુરસ્ત્વં ગણરાજ ચાદૌ ।
સ્વાનન્દસંજ્ઞે નગરે વિભાસિ સિદ્ધ્યા ચ વુદ્ધ્યા સહિતઃ પરેશ ॥ ૨૮॥

તં ત્વાં ગણેશં શરણં પ્રપદ્યે સ્થિતં સદા હૃત્સુ ચ યોગિનાં વૈ ।
વેદૈર્ન વેદ્યં મનસા ન લભ્યં તં વક્રતુણ્ડં હૃદિ ચિન્તયામિ ॥ ૨૯॥

અર્ધનારીશ્વરત્વં યત્તદ્દત્તં મેઽધુના પ્રભો ।

શક્તિહીનત્વમાપન્નો નષ્ટવત્કર્મણા કૃતઃ ॥ ૩૦॥

નાનૈશ્વર્યયુતા દેવી સા ગતા ગણપ પ્રભો ।
અનીશ્વરપદં પ્રાપ્તં મમ વૈ દેવદેવ ભોઃ ॥ ૩૧॥

નિર્ગુણોઽહં સદા શમ્ભુઃ સગુણઃ સર્વભાવવિત્ ।
શક્ત્યા યુક્તો યદા સ્વામિન્નધુના કિં કરોમ્યહમ્ ॥ ૩૨॥

શક્તિહીનઃ પદા ગન્તું ન શક્નોમિ ગણેશ્વર ।
અતસ્ત્વં કૃપયા દેવ શક્તં માં કુરુ કર્મણિ ॥ ૩૩॥

તતઃ પ્રાદુરભૂત્તસ્ય પુરતઃ સ ગણાધિપઃ ।
ઉવાચ શઙ્કરં તત્ર હર્ષયન્ શ્લક્ષ્ણયા ગિરા ॥ ૩૪॥

અહો પશ્ય ચ માં શમ્ભો કિં શોચસિ મહેશ્વર ।
ભવિતાસિ સશક્તિસ્ત્વં મદ્વાક્યાન્નાત્ર સંશયઃ ॥ ૩૫॥

અહમેવેશ્વરો દેવો હ્યેકો બ્રહ્માણ્ડમણ્ડલે ।
તેન ગર્વેણ યુક્તસ્ત્વં સ વિઘ્નઃ સહસા કૃતઃ ॥ ૩૬॥

અધુના તે ગતો મોહો મદીયા સ્મૃતિરાગતા ।
ધ્યાતસ્તુતશ્ચ તેનાઽહં પ્રસન્નોઽસ્મિ ન સંશયઃ ॥ ૩૭॥

હિમાચલસુતા દેવી ભવિષ્યતિ ન સંશયઃ ।
વૃણોષિ ત્વં સતીં તાં વૈ પાર્વતીં ચ પુનઃશિવ ॥ ૩૮॥

રમસે ચ તયા સાર્ધં મત્તયા ભાવિતો દૃઢમ્ ।
ઈશ્વરઃ સહશક્તિસ્ત્વં મત્પ્રસાદાત્સદા ભવ ॥ ૩૯॥

સ્મૃતમાત્રસ્તવાગ્રેઽહં પ્રત્યક્ષઃ સ્યાં સદાશિવ ।
ઇતિ દત્ત્વા વરં દેવસ્તત્રૈવાન્તરધીયત ॥ ૪૦॥

ઇતિ શ્રીમુદ્ગલપુરાણે પ્રથમે ખણ્ડે વક્ત્રતુણ્ડચરિતે
ચતુર્થાધ્યાયાન્તર્ગતા શિવકૃતા ગણેશસ્તુતિઃ સમાપ્તા ॥ ૧.૪

Proofread by PSA Easwaran

*Ganesha Stuti by Shiva*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*